# श्रीअरविन्दोपनिषद्

# Sriaurobindopanishad

# श्रीअरविन्दोपनिषद्

(Sriaurobindopanishad)

संस्कृतकार्यालयः
श्रीअरविन्दाश्रमः, पुदुच्चेरी

Questo e-book è stato preparato da Auro e-Books,
un sito web internazionale dedicato agli e-books
sul Benessere e la Spiritualità.



Scopri altri e-books ed attività sul nostro sito:
www.auro-ebooks.com

Prima edizione 1987, Terza edizione 2000,
Seconda impressione 2010
Edizione Ebook 2016

© Sri Aurobindo Ashram Trust 1987, 2000
Pubblicato da Sanskrit Karyalaya, una unit del
Sri Aurobindo Ashram Publication Department,
Pondicherry 605002
web: http://sabda.sriaurobindoashram.org/

# Índice


Prefazione .......... 1

Testo sanscrito .......... 8

Testo inglese .......... 22

Testo italiano .......... 26

Glossario termini sanscriti .......... 31

# भूमिका

इयम् उपनिषद् श्रीअरविन्दाश्रमेण प्रकाशितायां *Sri Aurobindo: Archives and Research* (श्रीअरविन्दः –प्रत्नानुसन्धानम्) इति पत्रिकायां १९७८तम–वर्षस्य डिसेम्बर–अङ्के आङ्ग्लानुवादेन सह प्रकाशिता । तत्र अस्याः रचनाकालः ख्रिस्ताब्दस्य १९१०तम–वर्षतः १९१४तम–वर्षमध्ये इति निर्दिष्टम् ।

श्रीअरविन्देन अस्याः रचनायाः शीर्षकं न दत्तम् । श्रीअरविन्दोपनिषद् इति शीर्षकम् अस्माभिः प्रदत्तम् ।

अस्मिन् संस्करणे अस्माभिः मूलपाठेन सह तस्य अन्वयः, भावार्थः आङ्ग्लानुवादश्च प्रदीयन्ते ।

श्रीअरविन्द–दर्शनस्य सारसर्वस्त्वं खलु इयम् उपनिषद् । अस्यां तेन इदम् उद्घोषितम्–

ब्रह्म सत्यं जगत् सत्यं सर्वं ब्रह्ममयं जगत् ।

एकमेवाद्वितीयं तज्जीवो ब्रत्रैव नापरः ।

—प्रकाशकः

# PREFACE

This Upanishad was written by Sri Aurobindo during the early part of his stay in Pondicherry (1910-1914). It was first published in the journal *Sri Aurobindo: Archives and Research* in December 1978 with English translation done by Sri Jagannath Vedalankar.

Sri Aurobindo did not give any title to this work. When it was published as a separate booklet, the title श्रीअरविन्दोपनिषद् was given by the editors and अन्वय (prose order) and भावार्थ (meaning) were included.

This Upanishad is the essence of Sri Aurobindo's teachings. According to him, this world is not an illusion. It is as true as Brahman.

For this 2016 digital version, the following people freely contributed their time, energy and expertise to bring this work to the public:

Manipadma Venupani - proofreading and editing the Sanskrit

Sergio Fedrigo - proofreading and editing the Sanskrit

Anandamaya - Italian translation of the English text

The rooted and fundamental conception of Vedanta is that there exists somewhere, could we but find it, available to experience or self-revelation, if denied to intellectual research, a single truth comprehensive and universal in the light of which the whole of existence would stand revealed and explained both in its nature and its end. This universal existence, for all its multitude of objects and its diversity of faces, is one in substance and origin; and there is an unknown quantity, X or Brhaman to which it can be reduced, for from that it started and in and by that it still exists. This unknown quantity is called Brahman.

- Sri Aurobindo

The Upanishads are Vedanta, a book of knowledge in a higher degree even than the Vedas, but knowledge in the profounder Indian sense of the word, **jñāna**. Not a mere thinking and considering by the intelligence, the pursuit and grasping of a mental form of truth by the intellectual mind, but a seeing of it with the soul and a total living in it with the power of the inner being, a spiritual seizing by a kind of identification with the object of knowledge is **jñāna**.

- Sri Aurobindo

# PREFAZIONE

Questa Upanishad fu scritta da Sri Aurobindo durante la prima parte del suo soggiorno a Pondicherry (1910-1914). Fu dapprima pubblicata sulla rivista *Sri Aurobindo: Archivi e Ricerche* nel dicembre 1978 con la traduzione inglese fatta da Sri Jagannath Vedalankar.

Sri Aurobindo non diede nessun titolo a questo lavoro. Quando fu pubblicato come un opuscolo separato, gli fu dato dagli editori il titolo श्रीजरविन्दोपनिषद् e furono inclusi अन्वय (per la prosa) e भावार्थ (per il significato).

Questa Upanishad è l'essenza del suo insegnamento. Secondo Sri Aurobindo, questo mondo non è un' illusione. Esso è reale come il Brahman.

In questa edizione digitale del 2016, per rendere disponibile quest'opera al pubblico, hanno contribuito gratuitamente con il loro tempo, energia e competenza, le seguenti persone:

Manipadma Venupani – correttore di bozze e redattore del sanscrito

Sergio Fedrigo – correttore di bozze e redattore del sanscrito

Anandamaya – traduzione italiana del testo inglese

La radicata e fondamentale concezione del Vedanta è che in qualche luogo esite, e non abbiamo che da trovarla, disponibile all'esperienza di auto-rivelazione, se negata alla ricerca intellettuale, una singola verità comprensiva ed universale alla luce della quale l'intera esistenza si troverebbe rivelata e spiegata sia nella sua natura che nel suo fine. Questa esistenza universale, per tutta la moltitudine dei suoi oggetti, e la diversità dei suoi aspetti, è una in sostanza ed origine; e c'è una quantità sconosciuta, X o Brahman alla quale può essere ridotta, perché da quella ebbe inizio e da quella e mediante quella ancora esiste. Questa quantità sconosciuta è chiamata Brahman.

– Sri Aurobindo

Le Upanishads sono il Vedanta, un libro di conoscenza di un grado più elevato perfino dei Veda, ma conoscenza nel più profondo senso indiano vivente della parola, jñāna. Non un semplice pensare e considerare fatto dall'intelligenza, la ricerca ed attaccamento ad una forma mentale di verità da parte della mente intellettuale, ma una sua visione con l'anima ed il vivere totalmente in essa con il potere dell'essere interiore, una comprensione spirituale attraverso una sorta di identificazione con l'oggetto della conoscenza è jñāna.

– Sri Aurobindo

# श्रीअरविन्दोपनिषद्

## मूलपाठः

ॐ । एकमेवाद्वितीयं ब्रह्म सदसद्रूपं सदसदतीतं नान्यत् किञ्चिदस्ति त्रिकालधृतं त्रिकालातीतं वा सर्वन्तु खलु ब्रह्मैकं यत् किञ्च जगत्यामणु वा महद्वोदारं वानुदारं वा ब्रह्मैव तद् ब्रह्मैव जगदपि ब्रह्म सत्यं न मिथ्या ।

स एव परात्परः पुरूषस्त्रिकालातीतः सकलभुवनातीतः सकलभुवनप्रविष्टः सदतीतोऽसदतीतः सन्मयः चिन्मय आनन्दमयोऽनाद्यन्तः सनातनो भगवान् ।

स निर्गुणो गुणान् धत्ते सगुणोऽनन्तगुणो निर्गुणत्वं भुङ्क्ते स्वयञ्चातिवर्तते निर्गुणत्वञ्च सगुणत्वञ्च न निर्गुणो न गुणी केवल एव यः ।

स भुवनातीतो भुवनानि धारयति भुवनभूतो भुवनानि प्रविशति कालातीतः कालो भवत्यनन्तः सान्तः प्रकाशत एको बहवोऽरूपो रूपी विद्याविद्यामय्या चिच्छक्त्या ।

स्वयन्तु न धर्ता न धार्यो नानन्तः न सान्तो नैको न बहुः नारूपो न रूपी केवल एव यः ।

सर्वाणि त्वेतानि नामानि यदेकत्वञ्च बहुत्वञ्चा–नन्तञ्च सान्तञ्च

प्रकाशन्त एव चिदात्मनि चिन्मये जगति ।

ॐ तत्सत् यच्च सच्चिदेव तच्चिन्मयं जगत् भासते चिदात्मनि सत्यप्रकाशः सत्यस्य भगवतः ।

यथा सूर्यस्य प्रतिबिम्ब एकः शान्ते जले बहवश्चले सत्यः सूर्यः सत्यः प्रतिबिम्बः सत्यप्रकाशः सतः सूर्यस्य न स स्वप्नः सतः प्रकाशस्तु सः, यथा वा सूर्यस्य ज्योतिः सौरं जगत् स्वशक्त्या धावदिव पूरयत् प्रकाशते सत्यं ज्योतिः सत्यप्रकाशः सतः सूर्यस्य न सोऽलीका भातिः सतः सत्यप्रकाशस्तु सः, यथा वा सूर्यस्य ज्वालामयं बिम्बं न स्वयं सूर्यः सूर्यस्य तु सूर्यत्वं प्रकाशयत्येतदन्नमयं रूपमन्नाश्रिते ज्ञाने तद्रूपातीतस्तु सूर्यः सत्यः सूर्यः सत्यं रूपं बिम्बाकृति सत्यप्रकाशः सतः सूर्यस्य न स मायान्वितः सतः सत्यप्रकाशस्तु सः, तथेह जगद्ब्रह्म सत्यप्रकाशो भगवतः न स्वप्नः न मायान्वितं नालीका भातिः सतः सत्यप्रकाशस्तु तद् न स्वयं भगवान् तथापि स्वयमेव सः । एषा परा मायैषा योगमाहात्म्यं रहस्यमयस्य योगेश्वरस्य कृष्णस्यैषा चिच्छक्त्या आनन्दमयी लीला परस्यातर्क्या गतिः ।

सर्वमिदमर्थतः सत्यं परार्थतः असत्यमिति मनस्तुष्ट्यर्थं विज्ञानार्थ मुच्यतां न हि किञ्चिदप्यसत्यं सत्ये ब्रह्मणि ।

एवं यत् प्रकाशते जगदानन्द एव तत् ।

ॐ तत्सत् यच्च सच्चिदेव तद्यच्च चित् स आनन्दः । यत्तु निरानन्दमिति भासते दुःखमिति दुर्बलमित्यज्ञानमिति तदानन्दस्य विकार आनन्दस्य क्रीडा ।

यो हि जीवः स आनन्दमयः प्रच्छन्नो भगवान् स्वप्रकाशमयं जगद्ब्रह्म भोक्तुमवतीर्णः । य एष दुःखभोगः स भोग एवानन्दमयस्तस्यानन्दमेवानन्दमयो भुङ्क्ते ।

को हि निरानन्दं भोक्तुमुत्सहेत यः सर्वानन्दमयः स एवोत्सहते निरानन्दमयस्तु निरानन्दं भुञ्जानः न भुञ्जीतानन्दं विना प्रणश्येत् । को दुर्बलो भवितुं शक्नुयाद्यः सर्वशक्तिमान् स एव शक्नुयाद् दुर्बलो ह्याक्रान्तो दुर्बलत्वेन न तिष्ठेच्छकितं विना प्रणश्येत् । कोऽज्ञानं प्रवेष्टुं समर्थो यः सर्वज्ञानमयः स एव समर्थोऽज्ञस्तु तस्मिंस्तिमिरे न ध्रियेतासत्त्वसदेव भवेद् ज्ञानं विना प्रणश्येत् । ज्ञानस्य क्रीडाज्ञानं स्वस्मिन्नात्मगोपनं शक्तेः क्रीडा दौर्बल्यं निरानन्दमानन्दस्य क्रीडात्मगोपनं स्वात्मनि ।

सानन्दं हसति जीवः सानन्दं क्रन्दत्यश्रूणि मुञ्चति तमोमय आनन्दे भासमान इव यातनाभिश्चेष्टमानः सानन्दं स्फुरति सानन्दं स्फुरति चेष्टमानः प्रचण्डाभी रतिभिः । पूर्णभोगार्थं तस्यानन्दस्य तामसस्यांशस्य

तामसो भूत्वानन्दं गोपयति ।

अज्ञानं मूलमेतस्य भावस्य सान्त एवाहमित्यशक्तो दुर्बलो दुःखी मया कर्तव्यं ज्ञातव्यं लब्धव्यं प्रयासेन तपः क्षयेण मृत्युना स त्वमेषोऽहं यत्त्वं न तदहं यत्तव शुभं तन्ममाशुभं येन तव लाभस्तेन मम हानिः त्वामेव हन्यां सुखी भविष्यामि नैव सात्त्विकोऽहं त्वामेव सुखिनं करोमि स्वदुःखेन स्वहान्या स्वमृत्युनेत्याद्यज्ञानस्य स्वरूपं मनसि ।

अहङ्कार एव बीजमहङ्कारमोक्षादज्ञानमोक्षः अज्ञानमोक्षाद् दुःखान्मुच्यते आनन्दमयोऽहं सोऽहमेकोऽहमनन्तोऽहं सर्वोऽहमिति विज्ञायानन्दमयो भवत्यानन्दो भवति ।

एष एव मोक्षः । स मुक्तः सर्वेषां भोगान् भुङ्क्ते सर्वानानन्दाननन्तं भुञ्जानो न सान्तैर्वियुज्यते सान्तानि भुञ्जानो नानन्तेन हीयते स एको भवति बहुर्भवति स ह्यजो जायत इव जायमानोऽपि न जायते न बध्यते न जन्म तस्य विद्यते आत्मन्यात्मात्मना प्रकाशयाम्यात्मान–मिति ज्ञानाद् विमुकतः क्रीडते ।

लीलार्थं हि जगदानन्दार्थं लीलामय इति लीलां कुरुता–नन्दस्य पुत्राः युक्ताः क्रीडतानन्दं भुङ्ग्ध्वमेकं भोग्यं भगवन्तं प्राप्य भुङ्ग्ध्वं सर्ववस्तुषु ।

आनन्दं हि प्रवक्ष्यामि भगवतादिष्टः । तामसमपावृत्या–नन्दः प्रकाशतां

तस्य पुत्राः!

## अन्वयः

ॐ । एकम् एव अद्वितीयं ब्रह्म । [तत्] सत्–असत्–रूपम् सत्–असत्–अतीतम् । [तद् विहाय] अन्यत् किञ्चित् न अस्ति । त्रिकाल–घृतं त्रिकाल–अतीतं वा सर्वं तु खलु एकं ब्रह्म । जगत्यां यत् किञ्च अणु वा महत् वा, उदारं वा अनुदारं वा, तत् ब्रह्म एव, ब्रह्म एव । जगत् अपि ब्रह्म । [तत्] सत्यम् न मिथ्या ।

स एव त्रिकाल–अतीतः, सकल–भुवन–अतीतः, सकल–भुवन–प्रविष्टः, सत्–तीतः, असत्–अतीतः, सत्–मयः, चित्–मयः, आनन्दमयः, न–आदि–अन्तः, परात्परः पुरूषः, सनातनः भगवान् ।

सः निर्गुणः [सन् अपि] गुणान् धत्ते, सगुणः, अनन्तगुणः [सन अपि] निर्गुणत्वं भुङ्क्ते, स्वयं च निर्गुणत्वं च सगुणत्वं च अतिवर्तते, [सः] न निर्गुणः, न गुणी, यः केवलः एव ।

भुवन–अतीतः सः भुवनानि धारयति, भुवनभूतः भुवनानि प्रविशति, काल–तीतः कालः भवति, अनन्तः सान्तः प्रकाशते, एकः बहवः, अरूपः रूपो [भवति] विद्या–अविद्यामय्या चित्–शक्त्या ।

स्वयं तु [सः] न धर्ता, न धार्यः, न अनन्तः, न सान्तः, न एकः, न बहुः, न अरूपः, न रूपी, यः केवलः एव ।

एतानि सर्वाणि तु नामानि यत् एकत्वं च बहुत्वं च, अनन्तं च सान्तं च, [एतानि] चिदात्मनि चिन्मये जगति प्रकाशन्ते एव ।

ॐ तत् सत्, यत् च सत् तत् एव चित्, चिन्मयं जगत् चिदात्मनि भासते, [तत्] सत्यस्य भगवतः सत्यप्रकाश ।

यथा सूर्यस्य प्रतिबिम्बः शान्ते जले एकः चले च बहवः, सूर्यः सत्यः, प्रतिबिम्बः सत्यः, सतः सूर्यस्य सत्यप्रकाशः, सः न स्वप्नः, सः तु सतः प्रकाशः, यथा वा सूर्यस्य ज्योतिः सौरं जगत् स्वशक्त्या धावत् इव पुरयत् प्रकाशते, ज्योतिः सत्यम्, सतः सूर्यस्य सत्यप्रकाशः, सः न अलीका भातिः, सः तु सतः सत्यप्रकाशः, यथा वा सूर्यस्य ज्वालामयं बिम्बं स्वयं न सूर्यः, एतत् अन्नमयं रूपं तु अन्नाश्रिते ज्ञाने सूर्यस्य सूर्यत्वं प्रकाशयति, सूर्यः तु तद्रूप–अतीतः, सूर्यः सत्यः, बिम्बाकृति रूपं सत्यम् सतः सूर्यस्य सत्यप्रकाशः, सः न मायान्वितः, सः तु सतः सत्यप्रकाशः, तथा इह जगद्ब्रह्म भगवतः सत्यप्रकाशः, [तत्] न स्वप्नः, न मायान्वितम् न अलीका भातिः, तत् तु सतः सत्यप्रकाशः, [तत्] स्वयं न भगवान् तथापि सः स्वयम् एव । एषा परा माया, एषा [माया] रहस्यमयस्य, योगेश्वरस्य कृष्णस्य योगमाहात्म्यम्, एषा चित्–शक्त्याः आनन्दमयी

लीला, परस्य अतर्क्या गतिः ।

इदं सर्वम् अर्थतः सत्यम् परार्थतः असत्यम् इति मनस्तुष्ट्यर्थम्, विज्ञानार्थम् उच्यताम्–सत्ये ब्रह्मणि न हि किञ्चिद् अपि असत्यम् ।

एवं यत् प्रकाशते तत् जगदानन्दः एव ।

ॐ तत् सत्, यत् च सत् तत् एव चित्, यत् च चित् सः आनन्दः । यत् तु निरानन्दम् इति, दुःखम् इति, दुर्बलम् इति, अज्ञानम् इति भासते तत् आनन्दस्य विकारः, आनन्दस्य क्रीडा ।

यः हि जीवः सः स्वप्रकाशमयं जगदब्रह्म भोक्तुम् अवतीर्णः आनन्दमयः प्रच्छन्नः भगवान् । एषः यः दुःखभोगः सः आनन्दमयः भोगः एव, आनन्दमयः तस्य आनन्दम् एव भुङ्क्ते ।

कः हि निरानन्दं भोक्तुम् उत्सहेत? यः सर्वानन्दमयः सः एव उत्सहते, निरानन्दमयः तु निरानन्दं भुञ्जानः न भुञ्जीत, आनन्दं विना प्रणश्येत् । कः दुर्बलः भवितुं शक्नुयात्? यः सर्वशक्तिमान् सः एव शक्नुयात्, दुर्बलः हि दुर्बलत्वेन आक्रान्तः न तिष्ठेत्, शक्तिं विना प्रणश्येत् । कः अज्ञानं प्रवेष्टुं समर्थः, यः सर्वज्ञानमयः सः एव समर्थः, अज्ञः तु तस्मिन् तिमिरे न ध्रियेत, असत् तु असत् एव भवेत्, ज्ञानं विना प्रणश्येत् । अज्ञानं ज्ञानस्य क्रीडा, स्वस्मिन् आत्मगोपनम्; दौर्बल्यं शक्तेः क्रीडा; निरानन्दम्

आनन्दस्य क्रीडा, स्वात्मनि आत्मगोपनम् ।

जीवः सानन्दं हसति, सानन्दं क्रन्दति, अश्रूणि मुञ्चति; तमोमये आनन्दे भासमानः इव यातनाभिः चेष्टमानः सानन्दं स्फुरति, प्रचण्डाभिः रतिभिः चेष्टमान सानन्दं स्फुरति; तस्य आनन्दस्य तामसस्य अंशस्य पूर्णभोगार्थं तामसः भूत्वा आनन्दं गोपयति ।

अहं सान्तः, अशक्तः, दुर्बलः, दुःखी हति एतस्य भावस्य मूलम् अज्ञानम् एव । मया प्रयासेन, तपः क्षयेण, मृत्युना कर्तव्यम्, ज्ञातव्यम् लब्धव्यम् त्वं सः, अहम् एषः, यत् त्वं तत् न अहम्, यत् तव शुभं तत् मम अशुभम्, येन तव लाभः तेन मम हानिः, त्वाम् एव हन्यां [चेत्] सुखी भविष्यामि, अहं नैव सात्त्विकः [यत्] स्वदुःखेन, स्वहान्या, स्वमृत्युना त्वाम् एव सुखिनं करोमि इत्यादि मनसि अज्ञानस्य स्वरूपम् ।

अहङ्कारः एव बीजम्, अहङ्कारमोक्षात् अज्ञानमोक्षः, अज्ञानमोक्षात् दुःखात् मुच्यते । 'आनन्दमयोऽहम् सोऽहम्, एकोऽहम्, अनन्तोऽहम्, सर्वोऽहम् इति विज्ञाय [जीवः] आनन्दमयः भवति, आनन्दः भवति ।

एषः एव मोक्षः । मुक्तः सः सर्वेषां भोगान् भुङ्क्ते, सर्वान् आनन्दान् अनन्तं भुञ्जानः सान्तैः न वियुज्यते, सान्तानि भुञ्जानः अनन्तेन न हीयते, सः एकः भवति, बहुः भवति, अजः हि सः जायते इव, जायमानः

अपि न जायते, न बध्यते, तस्य जन्म न विद्यते, आत्मा [अहम्] आत्मनि आत्मना आत्मानं प्रकाशयामि इति ज्ञानात् विमुक्तः [सः] क्रीडते ।

[हे] आनन्दस्य पुत्राः! जगत् हि लीलार्थम्, [सः] आनन्दार्थं लीलामयः इति [ज्ञात्वा] लीलां कुरुत, युक्ताः क्रीडत, आनन्दं भुङ्ग्ध्वम्, एकं भोग्यं भगवन्तं सर्ववस्तुषु प्राप्य भुङ्ग्ध्वम् ।

भगवता आदिष्टः हि आनन्दं प्रवक्ष्यामि । [हे] तस्य पुत्राः! तामसम् अपावृत्य आनन्दः प्रकाशताम् ।

## भावार्थः

ॐ । ब्रह्म एकम् एव, अद्वितीयम् । यत् किमपि आसीत्, अस्ति भविष्यति वा तदेव सत्, यत् च नास्ति, न व्यक्तम्, भावात्मक–कल्पनाम् अतिक्रान्तं तत् असत् । सत् असत् च उभे अपि ब्रह्मणः रूपे । ब्रह्म इमे उभे अतीतम् । तदतिरिक्तं तद्भिन्नं वा अन्यत् किमपि नास्ति । यत् किमपि त्रिकालगतं त्रिकालातीतं वा तत् सर्वं खलु तदेकं ब्रह्म एव । विश्वे यत् किमपि लघु वा बृहत् वा, उच्चं वा नोचं वा तत् ब्रह्म एव, ब्रह्म एव । जगत् अपि ब्रह्म । जगत् सत्यम्, न मिथ्या ।

सः परात्परः पुरुषः एव भूतम्, भवत्, भविष्यत् इति इदं त्रिकालम् अतीतः, सर्वाणि भुवनानि अतीतः, सर्वाणि भुवनानि सृष्ट्वा तानि प्रविष्टः,

सत् असत् इति उभे अतीतः, सत्स्वरूपः, चित्स्वरूपः, आनन्दस्वरूपः, अनादिः, अनन्तः, सनातनः भगवान् ।

सः निर्गुणः सन् अपि गुणान् धारयति, सगुणः, अनन्तगुणः सन् अपि निर्गुणत्वस्य उपभोगं करोति, स्वयं सः निर्गुणत्वं सगुणत्वं च अतीत्य तिष्ठति । सः न निर्गुणः, न गुणी; सः केवलः, अद्वितीयः ।

भुवनानि अतिक्रान्तः सः भुवनानि धारयति, भुवनानि सञ्जातः सः भुवनानि प्रविशति, कालम् अतीतः सः कालः भवति, अनन्तः सः सान्तः प्रकाशते, एकः सः अनेकः भवति, अरूपः सः रूपी भवति । विद्या–अविद्यामय्या चित्–शक्त्या सः एतत् सर्वं सञ्जायते ।

स्वयं सः न धर्ता, न धार्यः, न अनन्तः, न सान्तः, न एकः, न बहुः, न अरूपः, न रूपी, सः केवलः, अद्वितीयः एव ।

एकत्वं च बहुत्वं च, अनन्तं च सान्तं च इति एतानि सर्वाणि नामानि । प्रकाशन्ते एव इमानि चिदात्मनि चिन्मये जगति ।

ॐ तत् सत्, यत् सत् तत् एव चित्, चिन्मयं जगत् चिदात्मनि प्रकाशते, तत् सत्यस्य भगवतः सत्यप्रकाशः ।

यथा सूर्यस्य प्रतिबिम्बः शान्ते जले एकः चले च बहवः, सूर्यः सत्यः,

प्रतिबिम्बः सत्यः, सः [प्रतिबिम्बः] सत्स्वरूपसूर्यस्य सत्यप्रकाशः, सः न स्वप्नः, सः तु सत्स्वरूपस्य भगवतः प्रकाशः, यथा वा सूर्यस्य ज्योतिः सौरजगत् स्वशक्त्या सवेगं प्लावयत् प्रकाशते, ज्योतिः सत्यम्, तत् सत्स्वरूपस्य सूर्यस्य सत्यप्रकाशः, सः न मिथ्या आभा, सः तु सत्स्वरूपस्य भगवतः सत्यप्रकाशः, यथा वा सूर्यस्य ज्वालामयं बिम्बं न स्वयं सूर्यः, एतत् भौतिकं रूपं तु अस्माकम् अन्नाश्रिते ज्ञाने सूर्यस्य सूर्यत्वं प्रकाशयति, सूर्यः तु तद्रूपम् अतीतः, सूर्यः सत्यः, तस्य बिम्बाकृति रूपं सत्यम्, तत् सत्स्वरूपस्य सूर्यस्य सत्यप्रकाशः, सः न मायान्वितः, सः तु सत्स्वरूपस्य भगवतः सत्यप्रकाशः, तथा इह जगद्ब्रह्म भगवतः सत्यप्रकाशः, तत् न स्वप्नः, तत् न मायान्वितम्, तत् न मिथ्या आभा, तत् तु सत्स्वरूपस्य भगवतः सत्यप्रकाशः । तत् स्वयं न भगवान्, तथापि सः स्वयं भगवान् एव । एषा परा माया, एषा माया रहस्यमयस्य, योगेश्वरस्य कृष्णस्य योगमाहात्म्यम्, एषा चित्–शक्त्याः आनन्दमयी लीला, परमेश्वरस्य अचिन्त्या गतिः ।

इदं सर्वं व्यावहारिक–दृष्ट्या सत्यम् पारमार्थिक–दृष्ट्या असत्यम् इति कथनं मनसः तुष्ट्यर्थम् एव, विज्ञानार्थं तु वक्तव्यं यत् वस्तुतः सत्ये ब्रह्मणि किमपि असत्यं नास्ति ।

इत्थं यत् प्रकाशते तत् जगदानन्दः एव ।

ॐ तत् सत्, यत् सत् तत् एव चित्, यत् च चित् सः आनन्दः । यत् निरानन्दम्, दुःखम्, दुर्बलम्, अज्ञानम् इति प्रतिभाति तत् आनन्दस्य विकारः, आनन्दस्य क्रीडा ।

यः हि देहधारी जीवः सः स्वप्रकाशमयं जगद्ब्रह्म भोक्तुम् अवतीर्णः आनन्दमयः, प्रच्छन्नः भगवान् एव । एषः दुःखभोगः आनन्दमयः भोगः एव, आनन्दमयः तस्य आनन्दम् एव भुङ्क्ते ।

कः खलु निरानन्दं भोक्तुंसाहसं कु र्यात्? यः पूर्णतः आनन्दमयः स एव करोति । यः निरानन्दमयः सः तु निरानन्दस्य भोगं कुर्वन् तं भोक्तुंन शक्नुयात्, आनन्दं विना विनश्येत् । कः दुर्बलः भवितुं शक्नुयात्? यः सर्वशक्तिमान् स एव शक्नुयात् । दुर्बलः हि दुर्बलत्वेन आक्रान्तः स्थातुमपि न पारयेत्, शक्तिं विना विनश्येत् । कः अज्ञानं प्रवेष्टुं समर्थः? यः सर्वज्ञानमयः स एव समर्थः । अज्ञः तु अज्ञानान्धकारे अवस्थातुं न शक्नुयात्, असत् तु असत् एव भवेत्, ज्ञानं विना विनश्येत् । ज्ञानस्य क्रीडा अज्ञानम्, स्वस्मिन् आत्मगोपनम्, शक्तेः क्रीडा दौर्बल्यम्, आनन्दस्य क्रीडा निरानन्दम्, स्वात्मनि आत्मगोपनम् ।

जीवः सानन्दं हसति, सानन्दं क्रन्दति, अश्रूणि मुञ्चति । तमोमये आनन्दे प्रकाशमानः इव, यातनाभिः, प्रचण्डाभिः रतिभिः चेष्टमानः सः आनन्देन स्फुरति, तस्य आनन्दस्य तामसस्य अंशस्य पूर्णभोगार्थं तामसः

भूत्वा आनन्दं गोपयति

अहं सान्तः, अशक्तः, दुर्बलः, दुःखी इति एतस्य भावस्य मूलम् अज्ञानम् एव । मया प्रयासेन, तपः क्षयेण, मृत्युना कर्तव्यम्, ज्ञातव्यम्, लब्धव्यम्, त्वं सः, अहम् एषः, यत् त्वं तत् न अहम्, यत् तव शुभं तत् मम अशुभम्, येन तव लाभः तेन मम हानिः, त्वाम् एव हन्यां चेत् सुखी भविष्यामि, अहं नैव सात्त्विकः यत् स्वदुःखेन, स्वहान्या, स्वमृत्युना त्वाम् एव सुखिनं करोमि इत्यादि मनसि अज्ञानस्य स्वरूपम् ।

अहङ्कार एव बीजम्, अहङ्कारमोक्षात् अज्ञानमोक्षः, अज्ञानमोक्षात् दुःखात् मुच्यते । आनन्दमयोऽहम्, सोऽहम्, एकोऽहम्, अनन्तोऽहम्, सर्वोऽहम् इति विज्ञाय जीवः आनन्दमयः भवति, आनन्दः भवति ।

एष एव मोक्षः । मुक्तः सः सर्वेषां भोगानाम् उपभोगं करोति, सर्वान् आनन्दान् अनन्तम् उपभुञ्जानः सान्तैः वियुक्तः न भवति, सान्तानि उपभुञ्जानः अनन्तं न हारयति, स एकः भवति, बहुः भवति, अजन्मा हि सः जायते इव, जायमानः अपि न जायते, न बध्यते, तस्य जन्म न विद्यते, आत्मा अहम् आत्मनि, आत्मना, आत्मानं प्रकाशयामि इति ज्ञानात् विमुक्तः सः क्रीडति ।

हे आनन्दस्य पुत्राः! लीलार्थं हि इदं जगत् । आनन्दार्थं सः लीलामयः

सञ्जातः । एतत् ज्ञात्वा लीलां कुरुत, तेन सह योगयुक्ताः क्रीडत, आनन्दस्य उपभोगं कुरुत, एकं भोग्यं भगवन्तं सर्ववस्तुषु प्राप्य तम् उपभुङ्ग्ध्वम् ।

भगवता आदिष्टः अहम् आनन्दं प्रवक्ष्यामि । हे तस्य पुत्राः! अन्धकारं दूरीकृत्य आनन्दः प्रकाशताम् ।

## Testo inglese

OM. There is Brahman alone, the One without a second. Being and non-being are its forms and It is also beyond Being and Non-Being. There is nothing else except That. All that is contained in the three times and all that is beyond the three times is indeed that One Brahman alone. Whatever is in the universe, small or large, noble or mean, is Brahman alone, Brahman alone. The world is also Brahman. It is true, not false.

That alone is the Transcendent Being, beyond all the three times, beyond all the worlds, penetrating all the worlds, beyond Being, beyond Non-Being, All-Being, All-Consciousness, All-Bliss, without beginning and end, the eternal Divine.

He is without quality and supports all qualities. He has qualities, infinite qualities, and enjoys the state of being without quality. He Himself transcends the state of being without qualities and the state of being with qualities. He is neither without quality nor with quality because He is One and Single.

He is beyond the worlds, yet He holds the worlds. He becomes the worlds and enters into them. He transcends Time, becomes Time. Infinite, He shines as Finite. One, He becomes Many. Formless, He assumes forms. He achieves all this by His Consciousness-Force which consists of Knowledge and Ignorance.

He himself is neither holder nor held, neither infinite nor finite, neither one nor many, neither formless nor formed, because He is One and Single.

All these are but Names, that which is called oneness and that which is called multiplicity, that which is called infinite and that which is called finite; all these Names shine out indeed in the world whose very Self is Consciousness and which consists of Consciousness alone.

OM (the triple Brahman, the outward-looking, the inward or subtle and the superconscient causal Purusha), Tat (the absolute), Sat (the supreme and universal existence in its

principle). And that which is Existence, the same is Consciousness. The world constituted of consciousness shines in the Spirit which is consciousness. It is the real light of the Real Divine.

As the reflection of the sun is one in calm water, but multiple in restless water; real is the sun, real the reflection, the real light of the real sun, it is not a dream but the light of a reality. Or as the light of the sun shines filling the solar world with its force as if running; real is that light, the real lustre of the real sun, that is not false shining, but a real lustre of a reality. Or as the flaming disc of the sun is not the sun itself, but this material form only manifests the sun-ness of the sun to our knowledge which is dependent on the material being, the sun is beyond that form; real is the sun, real the form in the shape of the disc, it is the real light of the real sun, not illusory, but the real light of a reality.

Similarly, here the World-Brahman is the true light of the Divine, not a dream, nor illusory, nor a false shining. It is the real light of the Reality, not the Divine in himself but still He himself only. This is the supreme Māyā, this is the greatness of the Yoga of the mysterious Lord of Yoga, Sri Krishna. This is His blissful Līlā with His Consciousness-Force, this is the inconceivable working of the Supreme.

All this is phenomenally true, but false in reality – this is for the satisfaction of the mind; for the comprehensive knowledge it must be said that there is nothing unreal in the real Brahman.

Whatever thus manifests is the World-bliss only.

OM (the triple Brahman, the outward-looking, the inward or subtle and the superconscient causal Purusha), Tat (the absolute), Sat (the supreme and universal existence in its principle). And that which is Existence, the same is Consciousness, and that which is Consciousness, the same is Bliss. As for that which appears as devoid of Bliss, as suffering and weakness and ignorance, it is the deformation of that Bliss, the play of Bliss.

That, indeed, which is Jīva (individual soul) is the all-blissful Divine in disguise, descended to enjoy the self-luminous World-Brahman. This which is the experience of suffering is an experience made of bliss. The All-Blissful enjoys its bliss only.

Who indeed could dare enjoy that which is devoid of bliss? He only could dare it who is all-blissful. As for him who is devoid of bliss, he while enjoying the blissless, would still not enjoy it, would rather perish without bliss. Who can become weak? He only can who is all-powerful. The weak one indeed invaded by weakness would not endure, but would perish without force. Who could enter Ignorance? Only He who is omniscient could enter it. As for the ignorant, he could not endure in that darkness, non-being would remain non-being only. It would perish without knowledge. Ignorance is the play of knowledge, concealing itself in itself. Weakness is the play of power, blisslessness the play of bliss, the concealment of itself in itself.

Blissfully laughs the Jīva, blissfully cries, sheds tears, blissfully throbs as if shining in dark Ānanda, agitated by tortures, blissfully throbs agitated by violent pleasures. For the full enjoyment of the dark ignorant portion of that Ānanda he (Jīva) conceals It, becoming obscure and ignorant.

Ignorance is the root of this idea that I am but finite and therefore incapable, weak and sorrowful. I have to act, know and achieve with labour, at the expense of energy, incurring mortality. Thou art that, I am this, that which thou art I am not, that which is good for thee is bad for me, I lose by that by which thou gainest, I shall be happy only if I kill thee. I am not at all so illumined and happy that I may make thee happy by my own suffering, by my own loss and by my death, etc. This is the form of Ignorance in Mind.

Ego is indeed its seed. By deliverance from Ego one is delivered from Ignorance. By deliverance from Ignorance one is delivered from suffering. Knowing that I am all-blissful, He am I, I am One, I am Infinite, I am All, one becomes all-blissful, one becomes a Being of Bliss.

This indeed is liberation. Liberated, he enjoys the enjoyments of all, enjoying all joys infinitely he is not separated from finites, enjoying finites he is not deprived of the Infinite. He is One, He becomes many. He is indeed unborn and is, as it were, born. Even being born He is not born, is not bound. He has no birth. “I the Self reveal Self by Self in Self” – liberated by this knowledge one enjoys the play.

For Līlā (play) indeed is the world. He has become playful for joy. Therefore be engaged in Līlā, O sons of Bliss! Being united, play. Enjoy the Bliss. Having attained the One enjoyable Divine, enjoy Him in all things.

As commanded by the Divine, I shall indeed expound the Bliss. Let the Bliss manifest itself removing the obscurity, O sons of Bliss, O sons of Bliss!

# Nota del traduttore

Nell'avvicinarmi alla traduzione in lingua italiana di questo importante lavoro di Sri Aurobindo, questa shruti, ho provato un senso di soggezione, non sentendomi in verità, in possesso della parola inevitabile... così ho chiesto di poter conservare in questa edizione, anche il testo in lingua inglese, per dare modo, a chi lo vorrà, di leggerlo nella sua forma originale.

Vorrei inoltre segnalare, ai lettori e studiosi di sanscrito, il lavoro di traduzione e commento in italiano con traslitterazione del testo fatto da Laura Calvani sulla base delle lezioni di Sraddhalu Ranade dell' Ashram di Pondicherry. Chi fosse interessato a questo lavoro, può scrivere una mail a: lauracalvani@virgilio.it

Buona lettura...

– Anandamaya

# Testo italiano

OM. C'è solo il Brahman, l'Uno senza secondo. Esistenza e non-esistenza sono le sue forme sebbene Esso sia di là dell'Esistenza e della Non-Esistenza. Eccetto Quello null'altro esiste. Tutto ciò che nei tre tempi è contenuto e tutto ciò che è oltre ad essi, invero è quell'unico Brahman. Tutto ciò che è nell'universo, piccolo o grande, nobile od insignificante, quello è Brahman, in realtà è Brahman. Ugualmente il mondo è Brahman. Esso è vero, non è falso.

Quello solo è l'Essere Trascendente, oltre tutti i tre tempi, oltre tutti i mondi, penetrante tutti i mondi, oltre l'Esistenza, oltre la Non-Esistenza, Tutto-Esistenza, Tutto-Coscienza, Tutto-Beatitudine, senza inizio né fine, il Divino eterno.

Privo di qualità supporta tutte le qualità. Ha qualità, infinite qualità, e gode lo stato d'essere senza qualità. Egli Stesso trascende lo stato d'essere senza qualità e lo stato d'essere con qualità. Invero Egli non è né senza qualità né con qualità inquanto è Uno e Solo.

È oltre i mondi, sebbene li contenga. Diviene i mondi e penetra in essi. Trascendendo il Tempo, diviene il Tempo. Infinito, come Finito risplende. Uno, diviene i Molti. Senza forma, veste molte forme. Egli ottiene tutto ciò mediante la sua Coscienza-Forza che consiste di Conoscenza e di Ignoranza.

Ma Egli stesso non è né contenitore né contenuto, né finito né finito, né uno né molti, né con forma né senza forma, inquanto Uno e Solo.

Tuttavia questi non sono che Nomi, ciò che è chiamato unità e ciò che è chiamato molteplicità, ciò che è chiamato infinito e ciò che è chiamato finito; invero tutti questi nomi risplendono nel mondo il cui vero Sé è Coscienza e che consiste di Coscienza solamente.

OM (il triplo Brahman, quello rivolto all'esterno, quello rivolto all'interno o sottile e il Purusha causale supercosciente), Tat (l'

assoluto), Sat (la suprema ed universale esistenza nel suo principio). Ciò che è Esistenza, quello stesso è Coscienza. Il mondo costituito di coscienza risplende nello Spirito che è coscienza. Esso è la luce reale del Divino Reale.

Così come il riflesso del sole è uno nell'acqua cheta, ma molteplice nell'acqua agitata; reale è il sole, reale il suo riflesso, luce reale del sole reale, non è un sogno, ma la luce di una realtà. Oppure, come splende la luce del sole riempiendo con la sua forza il mondo solare come correndo; reale è quella luce, reale lo splendore del sole reale; questo non è falso splendore, ma reale splendore di una realtà. Oppure come il fiammante disco del sole non è il sole stesso, ma la sua forma materiale manifestante la solarità del sole alla nostra conoscenza che dipende dall'esistenza materiale, il sole è oltre quella forma; reale è il sole, reale la forma nella figura del disco, essa è la luce reale del sole reale, non è illusoria, ma luce reale di una realtà.

Allo stesso modo, il Mondo-Brahman è qui la vera luce del Divino, né un sogno, né un'illusione, né un falso splendore. È la luce reale della Realtà, non il Divino in sé stesso, eppure ancora Sé stesso unicamente. Questa è la Māyā suprema, questa la grandezza dello Yoga del misterioso Signore dello Yoga, Sri Krishna. Questa è la Sua Līlā di beatitudine con la sua Coscienza-Forza, questa è l'inconcepibile dinamica del Supremo.

Tutto ciò è fenomenicamente vero, ma falso in reltà – questo è per la soddisfazione della mente; per la completa conoscenza deve essere detto che non c'è nulla di irreale nel Brahman reale.

Qualsiasi cosa quindi si manifesti è unicamente il Mondo-di-Beatitudine.

OM (il triplo Brahman, quello rivolto all'esterno, quello rivolto all'interno, quello interiore o sottile ed il Purusha causale supercosciente), Tat (l'assoluto), Sat (la suprema ed universale esistenza nel suo principio). E quello che è Esistenza, quello stesso è Coscienza, e quello che è Coscienza, quello stesso è Beatitudine. Perciò ciò che appare come privo di Beatitudine, come sofferenza e debolezza ed ignoranza, ciò è la deformazione

di quella Beatitudine, il gioco della Beatitudine.

Invero, quello che è il Jīva (l'anima individuale), è il Divino tutto-beatitudine celato, disceso per godere del Mondo-Brahman auto-luminoso. Questa che è esperienza di sofferenza è esperienza fatta di beatitudine. Il Tutto-Beatitudine gioisce della sua beatitudine solamente.

Chi in verità oserebbe gioire di ciò che è privo di beatitudine? Egli solamente può osarlo, essendo tutto-beatitudine. Quanto a colui che è privo di beatitudine, anche se tentasse di gioire di questa mancanza, non ne potrebbe gioire, piuttosto ne morrebbe. Chi può divenire debole? Soltanto Colui che è onnipotente. Difatti il debole invaso dalla debolezza non durerebbe; ma perirebbe senza forza. Chi può entrare nell'Ignoranza? Solo Colui che è onnisciente vi può entrare. Difatti chi è nell'Ignoranza, non potrebbe perdurare nelle tenebre, il non-essere rimarebbe solo non-essere. Senza conoscenza perirebbe. L'Ignoranza è il gioco della Conoscenza che si nasconde in sé stessa. La debolezza è il gioco della Forza, l'assenza di beatitudine il gioco della Beatitudine, l'occultamento del Sé nel sé.

Gioiosamente ride il Jīva, con gioia piange, versa lacrime, gioiosamente pulsa come se risplendesse in un oscuro Ananda, agitato da torture, pulsa gioiosamente agitato da violenti piaceri. Per il pieno godimento dell'oscura parte ignorante di quell'Ananda egli [il Jīva] lo nasconde, divenendo oscuro ed ignorante.

L'Ignoranza è la radice dell'idea che io sono soltanto finito e perciò incapace, debole e sofferente. Devo agire, conoscere e conquistare con fatica, spendendo energia, andando incontro alla morte. Tu sei quello, io sono questo, ciò che tu sei, io non sono, ciò che è per te bene per me è male, io ci perdo in ciò che tu guadagni, sarò felice solo quando ti avrò ucciso. Non sono affatto così illuminato e felice da poterti rendere felice con la mia sofferenza, con la mia perdita, con la mia morte, etc. Questa la forma dell'Ignoranza nella Mente.

In verità il suo seme è l'Ego. Mediante la liberazione dall'Ego si è liberi dall'Ignoranza. Mediante la liberazione dall'Ignoranza, si è

liberi dalla sofferenza. Sapendo che io sono tutto-beatitudine, io sono Lui, sono l'Uno, sono Infinito, sono il Tutto, si diviene tutto-beatitudine, si diviene un Essere di Beatitudine.

Invero questa è la liberazione. Liberato, egli gioisce delle gioie di tutti, gioiendo di tutte le gioie infinitamente egli non è separato dalle forme finite, gioiendo delle forme finite egli non è deprivato dell'Infinito. Essendo l'Uno, diviene i Molti. In verità, non-nato, è come se fosse nato. Anche essendo nato, Egli non è legato. Non ha nascita. “Io il Sé, rivelo il Sé mediante il Sé nel Sé.” – da questa conoscenza liberati, si gioisce del gioco.

A causa di ciò esiste il mondo, per questa Līlā [Gioco]. Per la gioia egli è divenuto giocoso. Perciò coinvolgetevi nella Līlā, O figli della Beatitudine ! Essendo uniti, giocate. Godete la Beatitudine. Avendo ottenuto l'Unico Divino che gioisce, gioite di Lui in tutte le cose.

Come comandato dal Divino, esporrò invero la Beatitudine. Che la Beatitudine si manifesti rimuovendo l'oscurità, O figli della Beatitudine, O figli della Beatitudine!

## Glossario termini sanscriti

**Ananda**: assoluta beatitudine

**Brahman**: lo Spirito, l'Assoluto, Quello, Esistenza unica, Essere primordiale, Divinità nel senso più elevato della parola, la Realtà suprema, la Verità trascendente.

**Jīva**: Il 'vivente', con riferimento all'anima individuale, l'essere vivente. Sinonimo di atman.

**Jñāna**: Significa "conoscenza" o, più appropriatamente, "conoscenza della Realtà Assoluta". È la Gnosi, la Sapienza assoluta, il Logos, la Saggezza Occulta.

**Līlā**: lett. 'avventura, gioco', il termine esprime l'azione del Divino nel mondo.

**Māyā**: Il significato originario di Māyā è quello di creazione, ma successivamente ha acquisito il significato di illusione. Nei Veda il termine Māyā indica il potere da cui ha origine il mondo materiale. Il termine, che letteralmente significa 'non questo', indica il carattere illusorio e temporaneo della natura materiale di Brahma, il potere che vela e che proietta. Apparenza irreale della natura. Velo di fenomeni che nasconde l'Assoluto. Esiste solo come sogno apparente.

**Om**: sillaba sacra, simbolo del Brahman. È composto da 3 lettere più una lettera trascendentale:

**A**: prima lettera (A-matra / Omkara) della sacra sillaba Om (Aum): rappresenta la totalità dell'esistenza nel suo stato di manifestazione grossolana, simbolo dello stato di veglia. Corrisponde al corpo grossolano.

**U**: seconda lettera dell'Omkara, simbolo dello stato di sonno con sogni. Corrisponde al corpo sottile.

**M**: terza lettera dell'Omkara, simbolo dello stato di sonno profondo. Corisponde al corpo causale.

**Quarto suono**: è trascendentale e consiste nel silenzio che segue i tre suoni del mantra. È un "suono silenzioso", un momento di assoluta contemplazione che rappresenta l'immanifesto, la condizione primordiale dell'Essere che precede la manifestazione. Rappresenta il Brahman. Lo stato di coscienza è Turīya.

**Purusha**: Termine che può indicare sia l'essere individuale che l'Essere primordiale, lo Spirito supremo, l'eterna Persona divina.

**Sat**: assoluto esistere: indica anche Brahman come Assoluto o Quello.

**Shruti**: ascolto, rivelazione, ciò che è stato realizzato dagli antichi rishi con l'ascolto ispirato in stato di contemplazione divina, quindi 'ciò che è stato rivelato da Dio'.

**Tat**: 'questo, quello, così'; pronome dimostrativo neutro sanscrito. Viene utilizzato nelle Upanishad per indicare la suprema Realtà spirituale (Brahman), per cui nessuna definizione elaborata da logica umana può essere esaustiva.

**Upanishad**: antichi testi che dissertano precipuamente sull'identità dello Spirito supremo (Brahman) e rappresentano, insieme alle Aranyaka, il momento più alto della speculazione indovedica. Il significato letterale del termine Upanishad, 'sedersi in basso vicino al [maestro]', rimanda alla natura iniziatica del sapere tradizionale.

**Veda**: lett. 'sapienza, conoscenza'. L'insieme delle scritture che la tradizione vedica considera di origine rivelata. "Udita" da antichi veggenti (rishi) in stato d'ispirazione divina, questa sapienza primordiale venne sistematizzata (secondo la moderna filologia fra il 1500 e il 500 a.C., tradizionamente fra la fine dello dvapara-yuga e l'inizio dell'attuale era di kali, quindi circa 3000 anni a.C.) in quattro raccolte titolate Rig-veda, Sama-veda, Yajurveda, Atharva-veda. Ciascuna raccolta comprende inni e preghiere (Mantra), libri di esegetica (Brahmana), di meditazione (Aranyaka) e di

speculazione introspettiva (Upanishad).

**Vedanta**: lett. ‘fine del Veda’, il termine designava originariamente le Upanishad, che costituiscono l’ultima parte delle Vedasamhita.

**Yoga**: lett. 'unione', dalla radice sanscrita yuj ‘unire, collegare’. Lo Yoga è la scienza per la reintegrazione del sé con la Realtà cosmica, della coscienza infinitesimale con la Coscienza cosmica. Rappresenta uno dei sei Darshana.